# प्रश्नोत्तर रत्नमालिका -

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

श्रीशं वंदे॥ कः खलु नालंक्रियते दृष्टादृष्टार्थसाधनपटीयान्॥ अनया कंठ
स्थितया प्रश्नोत्तररत्नमालिकया॥१॥ भगवन् किमुपादेयं गुरुवचनं हेय
मपि च किमकार्यं॥ को गुरुरधिगततत्वः शिष्यहितायोद्यतः सततं॥२॥ त्व
या रितं किं कर्तव्यं सुधि संसारसंततिछेदः॥ किं मोक्षतरोर्बीजं सम्यक्ज्ञानं क्रि
यासहितं॥३॥ कः पथ्यतरो धर्मः कः शुचिरिह यस्य मानसं शुद्धं॥ कः पंडितो
विवेकी किं विषमवधीरणा गुरुषु॥४॥ किं संसारे सारं बहुशो विचिंत्यमानमि
दमेव॥ मनुजेषु दृष्टतत्वं स्वपरहितायोद्यतं जन्म॥५॥ मदिरेव मोहजनकः
कः स्नेहः के च दस्यवो विषयाः॥ का भववल्ली तृष्णा को वैरी यस्त्वनुद्योगः
॥६॥ कस्माद्भयमिह मरणादंधादपि को विशिष्यते रागी॥ कः शूरो यो
ललनालोचनबाणैर्न च व्यथितः॥७॥ पातुं कर्णांजलिभिः किम
मृतमिव युज्यते सदुपदेशः॥ किं गुरुताया मूलं यदेतदप्रार्थनं नाम
॥८॥ किं गहनं स्त्रीचरितं कश्चतुरो यो न खंडितस्तेन॥ किं दारिद्र्य

(2)

मतृप्तिः किंलाघवमधमतो याच्ञा ॥९॥ किंजीवितमनवद्यं किंजाड्यं
पाठवेप्यनभ्यासः ॥कोजागर्ति विवेकी कानिद्रामूढताजंतोः ॥१०॥को
नरकः परवशता किंसोख्यंसर्वसंगविरतिर्या॥किंसाध्यंभूतहितं किंप्रि
यः प्राणिनामसवः ॥११॥ नलिनीदलगत वत्तरलं किं धनं यौवनं चा
युः ॥केशशधरकरनिकरानुकारिणः सज्जना एव ॥१२॥ किंदान
मनाकांक्षं किंमित्रंयन्निवारयति पापात् ॥कोलंकारः शीलं किंवाचांमं
डनंसत्यं ॥१३॥ किमनर्थफलं मानसमसंगतिः कासुखावहामैत्री ॥स
र्वव्यसनविनाशे कोदक्षः सर्वथा त्यागी ॥१४॥ कोंधोयोकार्यरतः
कोबधिरोयः शृणोति नहितानि ॥कोमूकोयः काले प्रियाणि वक्तुं
नजानाति ॥१५॥ किंमरणंमूर्खत्वं किमनर्घ्यंयत्ववसरेदत्तं ॥आमरणात्
किंशल्यंप्रछन्नंयत्कृतंपापं ॥१६॥ कुत्रविधेयोयत्नोवेदाभ्यासेसदौ

द्वा

(2A)

पथ्येज्ञाने ॥ अवधीरणा क का कार्या खलु परयोषित्परधनेषु ॥१७॥ किमहर्नि
शमनुचिंत्यं संसारासारता न तु प्रमदा ॥ का प्रेयसी विधेया करुणा दीनेषु स
ज्जने मैत्री ॥१८॥ कः पूज्यः सद्वृत्तः कमधममाचक्षते स्खलद्वृत्तं ॥ केन जितं
जगदेतत्सत्यतितिक्षावता पुंसा ॥१९॥ कस्मै नमस्क्रिया स्याद्देवानाम
पि दयाप्रधानाय ॥ कस्माद्द्वेगितव्यं संसारारण्यतः सुधिया ॥२०॥
कस्य वशे प्राणिगणः सत्यप्रियभाषिणो विनीतस्य ॥ क स्थातव्यं न्या
य्ये पथि दृष्टादृष्टार्थलाभाय ॥२१॥ विद्युद्विलसितचंचलमिह किं दु
संगति युवतिमैत्री ॥ कुलशीलनिष्प्रकंपाः के कलिकालेपि सत्पुरुषाः
॥२२॥ किं शोच्यं पावण्यं सति विभवे किं प्रशस्यमौदार्यं ॥ तनुतरवित्त
स्य तथा प्रभविष्णोर्यत्सहिष्णुत्वं ॥२३॥ कंठगतैरप्यसुभिः कस्या
त्मा नो वशमुपायाति ॥ मूर्खस्य विषादवतो गर्ववतो कृतघ्नस्य ॥२४॥

(3)



चिंतामणिरिव दुर्लभमिह किमतच्चतुर्भद्रं॥ दानंप्रियवाकसहितंज्ञानमगर्वं
क्षमान्वितंशौर्ये॥ वित्तंत्यागसमेतंदुर्लभमेतच्चतुर्भद्रं॥२५॥ कः कुलकमलदि
नेशः सतिगुणविभवेपियोनम्रः॥ कस्यवशेजगदेतत् प्रियहितवचनस्यध
र्मनिरतस्य॥२६॥ परधनहृदयहराकामकविताविवेकवनिताच॥ कंनस्पृ
शतिविपत्तिवृंद्धवचोनुवर्त्तिनं दातारं॥२७॥ कस्मैस्पृहयति कमला निर
तसच्चिताय नीतिवृत्ताय॥ त्यजति च कं द्विजगुरुनिंदकंचसालस्यं॥२८॥
कुत्रखलुविधेयोवासः सज्जननिकटेथवा काश्यां॥२९॥ इतिकंठगत विमलप्रश्नोत
र रत्नमालिकायेषां॥ तेमुक्ताभरणाइव विमला आभांति विद्वत्सु॥३०॥ इ
तिश्रीआचार्य विरचिता प्रश्नोत्तररत्नमालिका॥ ॥श्रीरस्तु॥

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com